# ॥ बोध्यगीता ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गीतं विदेहराजेन जनकेन प्रशाम्यता ॥ ५५ ॥

अनन्तं बत मे वित्तं यस्य मे नास्ति किं चन ।
मिथिलायां प्रदीप्तायां न मे दह्यति किं चन ॥ ५६ ॥

अत्रैवोदाहरन्तीमं बोध्यस्य पदसञ्चयम् ।
निर्वेदं प्रति विन्यस्तं प्रतिबोध युधिष्ठिर ॥ ५७ ॥

बोध्यं दान्तमृषिं राजा नहुषः पर्यपृच्छत ।
निर्वेदाच्छान्तिमापन्नं शान्तं प्रज्ञान तर्पितम् ॥ ५८ ॥

उपदेशं महाप्राज्ञ शमस्योपदिशस्व मे ।
कां बुद्धिं समनुध्याय शान्तश्चरसि निर्वृतः ॥ ५९ ॥

बोध्य

उपदेशेन वर्तामि नानुशास्मीह कं चन ।
लक्षणं तस्य वक्ष्येऽहं तत्स्वयं प्रविमृश्यताम् ॥ ६० ॥

पिङ्गला कुररः सर्पः सारङ्गान्वेषणं वने ।
इषुकारः कुमारी च स एते गुरवो मम ॥ ६१ ॥

॥ इति बोध्यगीता समाप्ता ॥

Please send corrections to Sunder Hattangadi(sunderh@ho(ail.co();

Last updated June 22, 1998